महावि० का नाम
अ० वि० सं० महावि० रहीमपुर, खगड़िया।

9.00 दिनाङ्क – 7.12.2020
उपशास्त्री द्वितीय वर्ष
10.00 व्याकरण
भाग 92

11.00 विषय – बहुव्रीहि समास प्रकरणम्।
'वीरपुरुषको ग्राम इति'। वीराः पुरुषा यस्मिन्निति
12.00 विग्रहः। 'शेषाद्विभाषा' इति कप्। अत्र कर्मादीनां
समासेनाभिहितत्वात् प्रथमैव 'प्रथमार्थे तु नेति'।
1.00 अन्यपदार्थशब्देन प्रथमान्तातिरिक्त द्वितीयाद्यन्ता-
र्थस्यैव विवक्षितत्वादिति भावः। व्यधिकरणानामपि
2.00 नेति। अनेकं प्रथमान्तमित्युक्तेरिति भावः। प्रादिभ्यः
प्रादिभ्यः परं धातुज प्रकृतिक प्रथमान्तं तस्य
3.00 अन्येन प्रथमान्तेन बहुव्रीहिर्वाच्यः। तत्र बहुव्रीहि
प्रादिभ्यः परस्य उत्तरपदस्य धातुजस्य लोपश्च
4.00 विकल्पेन वाच्य इत्यर्थः। अत्र बहुव्रीहिरित्यनु-
वादः, लोपस्यैव विधिः। प्रपतितपर्ण इति। प्रकृष्टं
5.00 पतितं प्रपतितम्। 'प्रादयो गताद्यर्थे' इति समासः।
प्रपतितं पर्णं यस्मादिति विग्रहः। प्रपर्ण इति।
6.00 प्रपतितेति पूर्वपदे धातुजस्य उत्तरपदस्य लोपे रूपम्।
'नञोऽस्त्यर्थानां'। नञः परेऽस्त्यर्थवाचिनां
7.00 सुबन्तानां बहुव्रीहिर्वाच्यः। तत्रास्त्यर्थवाचिना-
मुत्तरपदभूतानां लोपश्च वा वक्तव्य इत्यर्थः।
'अविद्यमानपुत्र इति'। न विद्यमान इति नञ्समासः।
नञो नलोपः। अविद्यमानः पुत्रो यस्येति विग्रहः।
'अपुत्र इति'। अस्त्यर्थकविद्यमानशब्दस्य लोपे
रूपम्। अत्रापि बहुव्रीहिरित्यनुवादः। 'अव्ययानां
NOTES चेति'। बहुव्रीहिर्वाच्य इति शेषः। 'उच्चैर्मुख
इति'। उच्चैरित्यस्याधिकरणशक्तिप्रधानतया
सप्तम्यन्तत्वेन प्रथमान्तत्वाभावाद् प्राप्ते

Scanned with CamScanner

December 2020

| wk | M | T | W | T | F | S | S |
|---|---|---|---|---|---|---|---|
| 49 | | 1 | 2 | 3 | 4 | 5 | 6 |
| 50 | 7 | 8 | 9 | 10 | 11 | 12 | 13 |
| 51 | 14 | 15 | 16 | 17 | 18 | 19 | 20 |
| 52 | 21 | 22 | 23 | 24 | 25 | 26 | 27 |
| 53 | 28 | 29 | 30 | 31 | | | |

2020 Tuesday November 24

329-037 • WK 48

बहुव्रीहि वचनम् । 'सप्तम्युपमान पूर्वपदस्योत्तर पद लोपश्चेति' । सप्तम्यन्तोपमान सहिते पूर्वपदे यस्य तत् सप्तम्युपमान पूर्व पदम्, तस्य समस्तपदस्य पदान्तरेण बहुव्रीहि र्वाच्यः। समस्त पदात्मके पूर्वपदे यदुत्तर पदं तस्य लोपश्च वक्तव्य इत्यर्थः। तत्र सप्तम्यन्त सहित समस्त पूर्व पदकं बहुव्रीहि मुदाहरति – 'कण्ठेस्थः कालो यस्य स कण्ठेकाल इति' । 'सुपि स्थः इति कः । कण्ठे तिष्ठतीति कण्ठेस्थः । उपपद समासः । 'अमूर्धमस्तकात्' – इति सप्तम्या अलुक् । कण्ठेस्थ इति समस्तपदम् । तस्य कालशब्देन बहुव्रीहिरित्यनुवादः । सुपो लुक् । तत्र कण्ठस्थेत्येतद् बहुव्रीहेः पूर्वपदं सप्तम्यन्त पद सहितं तस्मिन् यदुत्तर पदं स्थेत्येतत् तस्य लोपो वाचनिकः । कण्ठेकाल इति सप्तम्यन्तपदघटित समासगर्भो बहुव्रीहिः । तदवयवभूत सप्तम्याः 'अमूर्धमस्तकात्' – इत्यलुक् । अथ उपमान सहित समस्त पूर्व पदकं बहुव्रीहिमुदाहरति – ~~उष्ट्र~~ उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुख इति । उष्ट्रस्य मुखमिवेति विग्रहे षष्ठीतत्पुरुषः मुखशब्दो मुखसदृशे लाक्षणिक इति सूचयितुमिव शब्दः । उष्ट्रमुखमिव मुखं यस्येति विग्रहे बहुव्रीहिरित्यनुवादः । तत्र उष्ट्रमुखे त्ये – तद्बहुव्रीहेः पूर्वपदं तस्मिन् उत्तरपदस्य मुखशब्दस्य लोपो वाचनिकः । 'संघात विकार षष्ठ्याश्चोत्तरपद लोपश्चेति' । षष्ठ्यन्तात्परस्य उत्तरपदस्य पदान्तरेण बहुव्रीहिर्वाच्यः । षष्ठ्यन्तादुत्तरपदस्य लोपश्च केशानां संघातश्चूडा यस्य स केशचूड इति । संघातशब्दस्य लोपे रूपम् । 'सुवर्णस्य विकारोऽलंकारो यस्य स सुवर्णालंकार इति । अत्र विकार शब्दस्य उत्तरपदस्य लोपे रूपम् । 'अस्ति क्षीरादयश्चेति' ।

दिनेश प्र० सिंह
(एसोसियेट ~~प्रोफेसर~~ प्रोफेसर)
व्याकरण

NOTES

DEC